# संस्कृतपाठ्यक्रमः

## औचित्यम्

संस्कृतभाषा विश्वस्य प्राचीनतमा भाषा अस्ति। अस्यां भाषायां ज्ञान-विज्ञानयोः अनेके ग्रंथाः लिखिताः; ये आधुनिकस्य विज्ञानस्यापि अध्ययने सहायकाः सन्ति। न केवलं भारतस्य सर्वासु भाषासु अस्याः प्रभावः स्पष्टतया दृश्यते अपितु 'अवेस्ता' आदि वैदेशिकभाषास्वपि वर्तते। अतएव इमां भाषां ज्ञात्वा वयं अन्याः भाषाः अपि सारल्येन ज्ञातुं शक्नुमः। नवशब्दनिर्माणे अस्याः भाषायाः सामर्थ्यमनुपमम् वर्तते। संस्कृतभाषायाः अध्ययनेन वयं भारतस्य प्राचीनतमां संस्कृतिम् अपि ज्ञातुं शक्नुमः। एषः पाठ्यक्रमः सम्प्रेषण-आधारितोऽस्ति। एषः राष्ट्रियमुक्तविद्यालयीय- शिक्षासंस्थानस्य माध्यमिक-स्तरीयछात्राणां मार्गदर्शनार्थं निर्मितोऽस्ति। अनेन छात्राः संस्कृतभाषायां निहितनैतिकमूल्यैः अपि परिचिताः भविष्यन्ति स्वजीवने च तानि धारयितुं समर्थाः भविष्यन्ति। राष्ट्रनिर्माणेऽपि ते अधिकाधिकं सहायकाः भविष्यन्ति।

## सामान्य-उद्देश्यानि

माध्यमिकस्तरे संस्कृतपठनस्य पाठनस्य च अधोऽङ्कितानि उद्देश्यानि सन्ति।

1. संस्कृतभाषायाः सामान्यज्ञानवर्धनम् भविष्यति येन संस्कृतस्य सरलान् अंशान् पठित्वा छात्राः तेषाम् अंशानाम् अर्थान् ज्ञास्यन्ति। ते स्वतः मौखिकीं लिखितां च अभिव्यक्तिं कर्तुं शक्ष्यन्ति।
2. संस्कृतसाहित्यं प्रति छात्रेषु अभिरुचेः वर्धनम्।
3. संस्कृतसाहित्यस्य प्रमुखविधानां (गद्यपद्यनाटकादीनां) प्रतिनिधिरचनानां ज्ञानम्।
4. छात्रेषु राष्ट्रियसांस्कृतिकसामाजिकनैतिक-मूल्यानां विकासः।
5. विज्ञानप्रौद्योगिकीक्षेत्रे प्राचीनभारतीयमनीषिणां मौलिकान्वेषणचिन्तनविशिष्टयोगदानैः छात्राणां परिचयः।

## विशिष्ट- उद्देश्यानि

### श्रवणकौशलम्

क. छात्राः संस्कृतस्य विशिष्टध्वनीन् श्रुत्वा अवगमिष्यन्ति। उदा.-पदान्तस्वरः पदान्तव्यञ्जनम्, विसर्गः, अनुस्वारः संयुक्ताक्षरम् इत्यादीनि।

ख. संस्कृतस्य सरलवाक्यानि तेषामर्थं श्रुत्वा ज्ञास्यान्ति तदनुसारेण च व्यवहारं करिष्यन्ति।

## वाचनकौशलम्

क. संस्कृते प्रयुक्तानां विशिष्टध्वनीनां सम्यक्-उच्चारणं करिष्यन्ति (उदा-स्वरः, मात्रा, व्यञ्जनम्, संयुक्ताक्षाराणि इत्यादि।)

ख. संस्कृतवाक्यानां सम्यक् उच्चारणं करिष्यन्ति।

ग. पद्यरचनानां सस्वरवाचनं करिष्यन्ति।

घ. पठितसामग्रीम् आश्रितानां प्रश्नानाम् उत्तराणि दास्यन्ति।

## पठनकौशलम्

क. संस्कृतगद्यांशानां, पद्यांशानां, नाट्यांशानां सारम् अवगमिष्यन्ति।

## लेखनकौशलम्

क. पठितपदानि वाक्यानि च श्रुत्वा शुद्धवर्तन्यां लेखितुं शक्ष्यन्ति।

ख. सन्धियुक्तपदानां समासयुक्तपदानां च वाक्यानाम् अनुलेखनं करिष्यन्ति।

ग. पठितकथायाः तस्यांशानां वा सारं संस्कृतवाक्येषु लेखितुं शक्ष्यन्ति।

घ. चित्राणि दृष्ट्वा संस्कृतभाषायां तेषां वर्णनं कर्तुं शक्ष्यन्ति।

ङ प्रदत्तानि वाक्यानि घटनाक्रमानुसारेण लेखितुं शक्ष्यन्ति।

## पाठ्यसामग्री

1. पाठ्यपुस्तकम् - संस्कृतम् - 1, सस्कृतम् - 2

2. अनुप्रयुक्तव्याकरणम्

3. सी.डी./कैसेट

द्वयोः पुस्तकयोः एकादश-एकादश (11-11) पाठाः = द्वाविंशः (22) पाठाः भविष्यन्ति। पाठ्यविषयरूपे आकर्षककथाः, सरलसंवादाः, नाट्यदृश्यानि, सुबोधशिक्षाप्रदं संयोजनं तत्रभविष्यति ललितपद्यं च, विशिष्टबालकानां महापुरुषाणां च जीवनचरित्रं प्राचीन-भारतीयमनीषिणां च महत्त्वपूर्णवैज्ञानिक-योगदानादयः। शेषं संस्कृतसाहित्यस्य विविधविधानां क्रमे आधुनिकप्रसिद्धरचनानाम् अपि संयोजनं तत्र भविष्यति।

## व्याकरणबिन्दवः

1. वर्णपरिचयः उच्चारणस्थानानि च।

2. सन्धिपरिचयः

   क. स्वरसन्धिः - दीर्घः, गुणः, वृद्धिः, यण्, अयादि।

   ख. व्यञ्जनसंधिः- श्चुत्व, ष्टुत्व, जश्त्व, चर्त्व, अनुस्वारः।

   ग. विसर्गसंधिः- सत्व, रुत्व, उत्व, रेफलोपः

## शब्दरूपाणि

स्वरान्त - बालक, फल, लता, मुनि, पति, मति, नदी, साधु, मधु, मातृ, पितृ धेनु।

व्यञ्जनान्त - राजन्, विद्वस्, गच्छत्, आत्मन्, पयस् च, नामन्, जन्मन्

सर्वनामपदानि - सर्व, यत्, तत्, किम्, इदम्, भवत्, अस्मद्, युष्मद् (सर्वेषु लिङ्गेषु)

संख्यावाचीशब्दाः - 1-5 (एकतः, पञ्चपर्यन्तम्) संख्यानां रूपाणि।

संख्याज्ञानम् - 1-100 (एकतः, शतपर्यन्तम्) संख्यानां संस्कृते लेखनम्)

## धातुरूपाणि

भ्वादि - भू, पठ्, पा (पिब्), गम् (गच्छ्) दृश्, (पश्य्), लिख्, लभ्, नी।

अदादि - अस्, ब्रू, हन्,

जुहोत्यादि - दा, धा।

दिवादि - नृत्, नश्, विद्, मन्।

स्वादि - शक्, श्रु, आप्।

तुदादि - प्रच्छ्, इष् (इच्छ)

तनादि - कृ, तन्

क्रयादि - क्री, ग्रह्

चुरादि - चुर, भक्ष्, कथ्

उपसर्गाः - पाठानुसारेण।

## प्रत्ययाः

कृत्प्रत्ययाः - क्त्वा, ल्यप्, तुमुन्, शतृ, शानच्, तव्यत्, अनीयर्, क्त, क्तवतु।

तद्धितप्रत्ययाः - मतुप्, तरप्, तमप्, ठक्, त्व, तल्, इन्।

स्त्रीप्रत्ययाः - टाप्, ङीप्

कारकविभक्तयः

कारक – उपपदविभक्तयश्च

सामान्यपरिचयः

समासाः–

अव्ययीभावः, तत्पुरुषः, कर्मधारयः, द्विगुः, द्वन्द्वः, बहुव्रीहिश्च। समस्तपदानां विग्रहः समस्तपदनिर्माणं च।

## अङ्कयोजना

| | | | | | | |
|---|---|---|---|---|---|---|
| क. | पाठ्यपुस्तकम् | | | | | 50 |
| | 1. | (i) | गद्यांशाधारितः | 05 | | |
| | | (ii) | पद्यांशाधारितः | 05 | = 15 | |
| | | (iii) | नाट्यांशाधारितः | 05 | | |
| | 2. | भावार्थः | | | | |
| | | (i) | गद्य | 05 | = 10 | |
| | | (ii) | पद्य | 05 | | |
| | 3. | प्रश्ननिर्माणम् | | 05 | | |
| | 4. | पाठाधारितप्रश्नाः | | 05 | | |
| | 5. | पाठ-सारांशः (कथामूलतः) | | 05 | | |
| | 6. | पाठाधारितलेखक/ग्रन्थपरिचयः | | 05 | | |
| | 7. | चरित्रचित्रणम् | | 05 | | |
| ख. | प्रायोगिक-व्याकरणम् | | | | | 30 |
| | 1. | वर्णपरिचयः | | | | |
| | | उच्चारणस्थानं च | | 02 | | |
| | 2. | सन्धिः | | | | |
| | | (i) | स्वरसन्धिः | 02 | | |
| | | (ii) | व्यञ्जनसंधिः | 02 | = 05 | |
| | | (iii) | विसर्गसंधिः | 01 | | |
| | 3. | शब्दरूपाणि | | | | |
| | | (i) | शब्दरूपम् | 04 | = 05 | |
| | | (ii) | संख्यावाचिशब्दाः | 01 | | |

| | | | | |
|---|---|---|---|---|
| | 4. | धातुरूपाणि | 04 | |
| | 5. | समासाः | 04 | |
| | 6. | प्रत्ययाः | | |
| | | 1. कृत्, क्त्वा, ल्यप्, तुमुन्, क्त, क्तवतु, शतृ शानच् | 02 | |
| | | 2. तद्धित्, त्व, तल्, ठक, तरप्, तमप् | 02 | = 05 |
| | | 3. स्त्री, टाप्, ङीप् | 1 | |
| | 7. | कारक | | |
| | | (i) कारकविभक्तयः | 01 | = 03 |
| | | (ii) उपपदविभक्तयः | 02 | |
| | 8. | उपसर्गाः | 01 | |
| | 9. | अव्ययपदानि | 01 | |
| ग. | रचना | | | 20 |
| | 1. | अनुच्छेदलेखनम् | 05 | |
| | | (संकेताधारितः) | | |
| | | मञ्जूषायुक्तः | | |
| | 2. | पत्रलेखनम् | 05 | |
| | 3. | चित्रवर्णनम् | 05 | |
| | 4. | अपठितगद्यांशाधारितप्रश्नोत्तराणि | 05 | |
| | | (40-50 शब्दपरिमितः) | | |
| | | संपूर्णयोगः | 100 | |

## मूल्यांकनयोजना

1. उपर्युक्तांकविभाजनानुसारेण (शतम्) (100) अङ्कानां एका लिखितपरीक्षा भविष्यति। एतदतिरिक्तम् सम्पर्ककक्षासु पञ्चविंशति (25) अङ्कानां शिक्षकांकितानि त्रीणि मूल्यांकनपत्राणि अपेक्षितानि। एषु एकम् छात्रैः अवश्यमेव करणीयम्। अध्ययनकेन्द्रेषु अस्याः (परीक्षायाः) मूल्यांकनं भविष्यति।

2. प्रश्नपत्रे ज्ञानावबोधनाभिव्यक्ति- इतिभेदत्रयाणां प्रश्नानां सम्यक् अनुपातस्य समायोजनं भविष्यति अनेन सह अतिलघूत्तरात्मक- लघूत्तरात्मक-निबन्धात्मक-प्रश्नानामपि समावेशः भविष्यति।

3. भाषाकौशलानां विकासार्थं विशेषतः श्रवणे भाषणे च अध्यापकैः सम्पर्ककक्षासु यथावसरं मौखिकमूल्यांकनं भविष्यति।

## अध्ययनयोजना

संस्कृतपाठ्यक्रमेण सह निम्नलिखितसामग्र्याः समायोजनं भविष्यति–

1. मुद्रिते द्वे पुस्तके।
2. श्रवणभाषणपठनलेखनकौशलानां विकासाय ध्वनिमुद्रिका (कैसेट) वा सान्द्रमुद्रिका (सीडी रोम) त्रीणि शिक्षकाङ्कित-मूल्यांकनप्रपत्राणि प्रदास्यन्ते। अनेन सह छात्रैः एकं परियोजनाकार्यमपि करणीयम्।
3. व्याकरणस्य शिक्षणं प्रायोगिकरूपेण पाठैः सह एव भविष्यति।
4. त्रिंशत् (30) सम्पर्ककक्षाः अध्ययनकेन्द्रेषु भविष्यन्ति।
5. श्रवणभाषणकौशलयोः विकासःअध्ययनकेन्द्रेषु संपर्ककक्षासु भविष्यति।
6. पाठनिर्माणे संपर्ककक्षासु च अध्यापनकाले छात्रेषु जीवनकौशलानां सम्यक् विकासः भवेत् इति ध्यातव्यम् भविष्यति। अनेन तेषु स्वतः चिंतनतर्कशक्तेश्च विकासः भविष्यति।
7. पाठ्यक्रममिमं विद्यार्थी एकवर्षत : अधिकाधिकं पञ्चवर्षेषु पूरयितुं शक्नोति।